(यथा, मनुः। ५। १२।
"कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम्" ॥)
कलिङ्ककच्छः। इति मेदिनी ॥ कलङ्कः। श्वेतचामरः। इति सारस्वतः। (त्वष्टृपुत्त्रविश्वरूपस्य शिरोभेदः। पुरा किल कदाचित् ऐश्वर्य्यमत्तेन सुरेश्वरेण यदा सभागतः सुराचार्य्यो गीष्पतिरसम्मानितोऽन्तरधीयत। तदा ब्रह्मोपदिष्टैरसुरप्रपीड़ितैरमरैस्त्वाष्ट्रं विश्वरूपं पौरोहित्ये वरयित्वा भूयः सन्नद्धैरसुरा बबाधिरे। विश्वरूपस्तु मातामहकुलस्यापेक्षया परोक्षमसुरेभ्योऽपि यज्ञभागं प्रददौ तदभिज्ञाय सुरपतिर्भीतः क्रुद्धश्च विश्वरूपस्य शिरांस्यच्छिनत्। तस्य खलु त्वाष्ट्रस्य कपिञ्जलः कलविङ्कस्तित्तिरिरिति त्रीणि शिरांस्यासन् तेषु सुरापायि शिर एव कलविङ्क इति बोध्यम्। एतद्विवरणन्तु श्रीमद्भागवते ६। ९ अध्याये सविस्तरं दर्शनीयम् ॥)

कलशः, त्रि, (कलं मधुराव्यक्तशब्दं शवति जलपूरणसमये प्राप्नोति। कल + शु गतौ + डः।) जलाधारविशेषः। कलशी इति ख्यातः। (यथा आर्य्यासप्तशती ६९०।
"प्रबलो विदरयिष्यति जलकलशं नीरलेखेव" ॥)
तत्पर्य्यायः। घटः २ कुटः ३ निपः ४। इत्यमरः। २। ९। ३२॥ कलसः ५ कलसिः ६ कलसी ७ कलसम् ८ कलशिः ९ कलशीः १० कलशम् ११। इति तट्टीका ॥ कुम्भः १२ करीरः १३। इति हेमचन्द्रः। कलावतीदीक्षाप्रकरणोक्तं तस्य परिमाणं। यथा, तन्त्रसारे।
"पञ्चाशदङ्गुलव्याम उत्सेधः षोड़शाङ्गुलः।
कलशानां प्रमाणन्तु मुखमष्टाङ्गुलं स्मृतम् ॥
षट्त्रिंशदङ्गुलं कुम्भं विस्तारोन्नतिशालिनम्।
षोड़शं द्वादशं वापि ततो न्यूनं न कारयेत्" ॥

कलशिः, स्त्री, (कलं शरीरमालिन्यं श्यति नाशयति। कल + शो + बाहुलकात् इन्। कं जलं लाति आदत्ते तथा सती शीर्य्यते। कल + शॄ + डिः।) पृश्निपर्णी। चाकुलिया इति भाषा। इत्यमरः। २। ४। ९३॥ (पृश्निपर्णीशब्देऽस्या गुणावली ज्ञातव्या॥) घटः। इत्यमरटीकायां रायमुकुटः॥ यथा, माघे ११। ८।
"कलशिमुदधिगुर्व्वीं बल्लवा लोड़यन्ति" ॥)

कलशी, स्त्री, (कलशि कृदिकारान्तत्वात् वा ङीप्।) स्वनामख्यातजलपात्रम्। पृश्निपर्णी। इत्यमरटीकायां रायमुकुटः ॥

कलसः, त्रि, (केन जलेन लसति शोभते। क + लस् + अच्।) कलशः। घटः। इति हेमचन्द्रः ॥ द्रोणपरिमाणे, पुं। इति वैद्यकपरिभाषा ॥
("चतुर्भिराढ़कैर्द्रोणः कलसो नल्वणोर्म्मणः" ॥
इति शार्ङ्गधरे पूर्ब्बखण्डे १ अध्याये ॥
"स एव कलसः ख्यातो घटस्तून्मानमेव च" ॥
इति चरके कल्पस्थाने १२ अध्याये॥)

कलसः, पुं, (केन जलेन लसतीति। लस् + अच्।) कुम्भः। अस्योत्पत्त्यादिर्यथा,—
"सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः।
पीयूषधारणार्थाय निर्म्मिता विश्वकर्म्मणा ॥
कलाः कलास्तु देवानामसिलास्ताः पृथक् पृथक्।
यतः कृतास्तु कलसास्ततस्ते परिकीर्त्तिताः ॥
नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत।
गोह्योपगोह्यो मरुतो मयूखश्च तथापरः ॥
मनोहा कृषिभद्रश्च विजयस्तनुशोधकः।
इन्द्रियघ्नोऽथ विजयो नवमः परिकीर्त्तितः ॥
तेषामेव क्रमाद्भूप नव नामानि यानि तु।
शृणु तान्यपराण्येव शान्तिदानि सदैव हि ॥
क्षितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः।
पवनाग्नी ततो द्वौ तु यजमानस्ततः परः।
कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः ॥
सोमस्तु सप्तमः प्रोक्तस्त्वादित्यस्तु तथाष्टमः।
विजयो नाम कलसो योऽसौ नवम उच्यते ॥
स तु पञ्चमुखः प्रोक्तो महादेवस्वरूपधृक्।
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयं तथा ॥
यथा काष्ठास्थितः सम्यक् वामदेवादिनामतः।
मण्डलस्य च मध्यान्तः पञ्चवक्त्रघटं न्यसेत् ॥
क्षितीन्द्रं पूर्व्वतो न्यस्य पश्चिमे जलसम्भवम्।
वायव्ये वायवं न्यस्य आग्नेये ह्यग्निसम्भवम् ॥
नैर्ऋत्ये यजमानन्तु ऐशान्यां कोषसम्भवम्।
सोममुत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
न्यस्यैवं कलसांश्चैव तेषु चैतान् विचिन्तयेत्।
कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः।
मूले तु संस्थितो विष्णुर्म्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्व्वे वेष्टयन्ति दिशो दश।
कुक्षौ तु सागराः सप्त सप्तद्वीपाश्च संस्थिताः ॥
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः।
गङ्गाद्याः सरितः सर्व्वा वेदाश्चत्वार एव च।
कलसे संस्थिताः सर्व्वे तेषु तानि विचिन्तयेत् ॥
रत्नानि सर्व्ववीजानि पुष्पाणि च फलानि च ॥
वज्रमौक्तिकवैदूर्य्यमहापद्मेन्द्रस्फाटिकैः।
सर्व्वधाममयं विल्वं नागरोडुम्बरं तथा ॥
वीजपूरकजम्बीरकाम्राम्रातकदाड़िमान्।
यवं शालिञ्च नीवारं गोधूमं सितसर्षपम् ॥
कुङ्कुमागुरुकर्पूरमदनं रोचनं तथा।
चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च ॥
कर्पूरपत्रचण्डञ्च जलं निर्यासकाम्बुदम्।
शैलेयं बदरं जातीपत्रपुष्पे तथैव च ॥
कालशाकं तथा एक्कां देवीं पर्णकमेव च।
वचां धात्रीं समञ्जिष्ठां तुरुष्कं मङ्गलाष्टकम् ॥
दूर्व्वां मोहनिकां भद्रां शतमूलीं शतावरीम्।
पर्णानां शवलां क्षुद्रां सहदेवां गजाङ्कुशाम् ॥
पूर्णकोषां सितां पाठां गुञ्जां सुरसिकालसौ।
श्यामकं गजदन्तञ्च शतपुष्पां पुनर्णवाम् ॥
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वसन्धानिकां तथा।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथा देवान् विधिं शम्भुं गदाधरम्।
यथाक्रमं पूजयित्वा शम्भुं मुख्यतया यजेत् ॥
प्रासादेन तु मन्त्रेण शम्भुतन्त्रेण शङ्करम्।
प्रथमं पूजयेन्मध्ये नानानैवेद्यवेदनैः ॥
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत्।
पूर्व्वं वहिःस्थापितेषु ग्रहाणां कलसेषु च ॥
नवग्रहान् पूजयेत्तु मातॄर्मातृघटेषु च।
सर्व्वे देवा घटे पूज्या घटस्तेषां पृथक् पृथक् ॥
नवैव तत्र पूर्व्वोक्ताः स्मृता मुख्यतमा नृप।
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ॥
यावकैः पायसैश्चापि यथासम्भवयोजितैः।
पुष्यस्नानाय नृपतिः पूजयेत् सकलान् सुरान्" ॥
इति कालिकापुराणे पुष्याभिषेकः ८७ अध्यायः ॥ * ॥ अन्यत् धारकशब्दे द्रष्टव्यम् ॥

कलसिः, पुं, (केन जलेन लसतीति। क + लस् + इन्।) पृश्निपर्णी। इत्यमरटीका शब्दरत्नावली च ॥ गर्गरी। इत्यमरटीका हारावली च ॥

कलसी, स्त्री, (कलस + स्त्रियां ङीप्।) पृश्निपर्णी। इति शब्दरत्नावली॥ (कलसी बृहतीद्वाक्षेत्यादिष्वस्या व्यवहारः॥ इत्युत्तरतन्त्रे। ३९ अध्याये सुश्रुतेनोक्तम् ॥) कलसः। इत्यमरटीका ॥ (स्वार्थे कन्प्रत्ययेनोक्तं यथा, नैषधे। २। ८।
"अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत" ॥)

कलसीसुतः, पुं, (कलस्यां जातः सुतः।) अगस्त्यमुनिः। इत्यमरटीकायां वाचस्पतिः ॥

कलसोदधिः, पुं, कलस इव उदधिः। मन्थनाधारत्वात्। समुद्रः। इति महाभारतम् ॥

कलहः, पुं स्त्री, (कलं कामं हन्त्यत्र। हन् + अधिकरणे डः।) विवादः। लड़ाइ झगड़ा इति भाषा॥ (यथा मनुः ४। १२१।
"न विवादे न कलहे न सेनायां न सङ्गरे" ॥)
तथा विष्णुपुराणे १ मांशे ९। १४५।
"अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन" ॥)
तत्पर्य्यायः। युद्धम् २ आयोधनम् ३ जन्यम् ४ प्रधनम् ५ प्रविदारणम् ६ मृधम् ७ आस्कन्दनम् ८ संख्यम् ९ समीकम् १० साम्परायिकम् ११ समरः १२ अनीकः १३ रणः १४ विग्रहः १५ सम्प्रहारः १६ अभिसम्पातः १७ कलिः १८ संस्फोटः १९ संयुगः २० अभ्यामर्द्दः २१ समाघातः २२ संग्रामः २३ अभ्यागमः २४ आहवः २५ समुदायः २६ संयत् २७ समितिः २८ आजिः २९ समित् ३० युध् ३१। इत्यमरः। २। ८। १०४॥ शमीकम् ३२ साम्परायकम् ३३ संस्फेटः ३४ युत् ३५। इति तट्टीका ॥

कलहः, पुं, (कल + हन् + "अन्येभ्योऽपीति" ३। २। १०१। डः।) वाटः। खड्गकोषः। भण्डनम्। इति मेदिनी ॥

कलहंसः, पुं, (कलेन मधुरास्फुटध्वनिना विशिष्टो हंसः। शाकपार्थिवादित्वात् मध्यपदलोपि समासः।) हंसविशेषः। बालिहाँस इति भाषा। तत्पर्य्यायः। कादम्बः २। इत्यमरः। २। ५। २३॥ कलनादः ३ मरालकः ४। इति राजनिर्घण्टः॥ राजहंसः। (यथा भट्टिः। २। १८।
"कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः" ॥)
नृपोत्तमः। इति विश्वमेदिन्यौ ॥ परात्मा। ब्रह्म। इति शब्दरत्नावली ॥ (अतिजगती वृत्तिः। सा